श्री स्कंद स्तवं

श्री स्कंद स्तवं

वामदेव उवाच |
ॐ नमः प्रणवार्थाय प्रणवार्थविधायिने |
प्रणवाक्षरबीजाय प्रणवाय नमो नमः || 1 ||

वेदांतार्थस्वरूपाय वेदांतार्थविधायिने |
वेदांतार्थविदे नित्यं विदिताय नमो नमः || 2 ||

नमो गुहाय भूतानां गुहासु निहिताय च |
गुह्याय गुह्यरूपाय गुह्यागमविदे नमः || 3 ||

अणोरणीयसे तुभ्यं महतोऽपि महीयसे |
नमः परावरज्ञाय परमात्मस्वरूपिणे || 4 ||

स्कंदाय स्कंदरूपाय मिहिरारुणतेजसे |
नमो मंदारमालोद्यन्मुकुटादिभृते सदा || 5 ||

शिवशिष्याय पुत्राय शिवस्य शिवदायिने |
शिवप्रियाय शिवयोरानंदनिधये नम || 6 ||

गांगेयाय नमस्तुभ्यं कार्तिकेयाय धीमते |
उमापुत्राय महते शरकाननशायिने || 7 ||

षडक्षरशरीराय षड्विधार्थविधायिने |
षडध्वातीतरूपाय षण्मुखाय नमो नमः || 8 ||

द्वादशायतनेत्राय द्वादशोद्यतबाहवे |
द्वादशायुधधाराय द्वादशात्मन्नमोऽस्तु ते || 9 ||

चतुर्भुजाय शांताय शक्तिकुक्कुटधारिणे |
वरदाय विहस्ताय नमोऽसुरविदारिणे || 10 ||

गजावल्लीकुचालिप्तकुंकुमांकितवक्षसे |
नमो गजाननानंदमहिमानंदितात्मने || 11 ||

ब्रह्मादिदेवमुनिकिन्नरगीयमान-
-गाथाविशेषशुचिचिंतितकीर्तिधाम्ने |
बृंदारकामलकिरीटविभूषणस्र-
-क्पूज्याभिरामपदपंकज ते नमोऽस्तु || 12 ||

इति स्कंदस्तवं दिव्यं वामदेवेन भाषितं |
यः पठेच्छृणुयाद्वापि स याति परमां गतिं || 13 ||

महाप्रज्ञाकरं ह्येतच्छिवभक्तिविवर्धनं |
आयुरारोग्यधनकृत्सर्वकामप्रदं सदा || 14 ||

इति श्रीशिवमहापुराणे कैलाससंहितायां एकादशोऽध्याये वामदेवकृत स्कंदस्तवं |